# Manikarnika Ashtakam

# मणिकर्णिकाष्टकम्

## Document Information

Text title : maNikarNikAShTakam

File name : maNikarNikAShTakam.itx

Category : misc, sahitya, aShTaka

Location : doc_z_misc_general

Transliterated by : Aaditya Kalyanaraman

Proofread by : Aaditya Kalyanaraman

Description/comments : From Kavya Sangraha, A Sanskrit Anthology, Dr. John Haeberlin, 1847

Latest update : April 29, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

# मणिकर्णिकाष्टकम्

अथ माहात्म्यम् ।
अनेकजन्मसाहस्रतपोध्यानशिवार्चनैः ।
अद्वैतानन्दसङ्गेन लब्धवेदान्तिसत्पदः ॥ १॥

सदाशिवसुतः शान्तः काश्यां गङ्गाधरः कविः ।
सर्वतीर्थवरां देवीं स्तौति श्रीमणिकर्णिकाम् ॥ २॥

आनन्दकाननमिदं सुखदं पुरैव
तत्रापि चक्रसरसि मणिकर्णिकाथ ।
स्वःसिन्धुसङ्गतिरथो परमास्पदञ्च
विश्वेशितुः किमिह तन्न विमुक्तये यत् ॥ ३॥

गर्जन्ति सर्वतीर्थानि स्वस्वधिष्ण्यगतान्यहो।
केवलं बलमासाद्य सुमहन्माणिकर्णिकम् ॥ ४॥

शिवाद्या देवसङ्घाश्च सनकाद्या महर्षयः।
ते सर्वे स्नातुमायान्ति मध्याह्ने मणिकर्णिकाम् ॥ ५॥

इच्छन्ति मरणं तच्च मुक्तये चामरा अपि।
अतश्च स्वकृतैः श्लोकैस्तां देवीं प्रार्थयेऽन्वहम् ॥ ६॥

अथ मणिकर्णिकाष्टकम् ।
विष्णोः सुतप्ततपसां चलितोतमाङ्ग
विश्वेशितुस्तडिदिवाम्बरतः सुकर्णात् ।
या चक्रतीर्थसलिले ललितापपातः
सा मे सदा शिवकरी मणिकर्णिकास्तु ॥ ७॥

चिन्तामणिस्तनुभृतां सहसान्तकाले
तत्तारकं व्यपदिशत्यथ कर्णिकायाम् ।
यस्यां मृतो न भवमेति भवप्रसादात्

सा मे सदा शिवकरी मणिकर्णिकास्तु ॥ ८॥

चन्द्रांसुका सुनयना धवला कुमारी
वेदैश्च पाणिकमलैर्वरमौक्तिकान्त्या ।
या दृश्यते सुकृतिभिर्वरकाशिकायां
सा मे सदा शिवकरी मणिकर्णिकास्तु ॥ ९॥

मालां सुपङ्कजमयों करकण्ठयोर्या
धत्ते वरोद्यतकरे शुभमातुलाङ्गम् ।
बद्धञ्च पाणियुगलं शुभपश्चिमास्यं
सा मे सदा शिवकरी मणिकर्णिकास्तु ॥ १०॥

दानावगाहसुरपूजनतर्पणादि
यस्यामनन्तफलदं भवति प्रसङ्गात् ।
भक्त्या कृतं यदि सएव जगत्पुनाति
सा मे सदा शिवकरी मणिकर्णिकास्तु ॥ ११॥

स्वर्गस्तृणं भवति चीरधरोऽपि राजा
मृत्युः सखा सुखहरोऽपि शवः शिवः स्यात् ।
पातोऽपि यत्र सुरसम्मत उत्तमाद्या
सा मे सदा शिवकरी मणिकर्णिकास्तु ॥ १२॥

सुप्तोऽपि योगिसमतां समुपैति यत्र
मग्नः स्मरेद्यदि शिवं सतु कालकालः ।
यद्धानतोप्यभयमेति च दूरवासी
सा मे सदा शिवकरी मणिकर्णिकास्तु ॥ १३॥

यत्सङ्गिवायुरपि दूरगतः सुसूक्ष्मः
पातालगं सुरगतं विधिगं करोति ।
जन्तून् पुनाति सकलानपि गां गता या
सा मे सदा शिवकरी मणिकर्णिकास्तु ॥ १४॥

संसारचिन्तामणिरत्र यस्मात्
तत्तारकं सज्जनकर्णिकायाम् ।
शिवोऽभिधत्ते सहसान्तकाले
तद्गीयतेऽसौ मणिकर्णिकेति ॥ १५॥

मोक्षलक्ष्मीमहापीठमणिस्तच्चरणाअयोः ।
कर्णिकेति ततः प्राहुर्यां जना मणिकणिकाम् ॥ १६॥

मणिकर्ष्याः स्तोत्रमिदं भुक्तिमुक्तिप्रदम्बरम् ।
पठतां शृणताश्चास्तु प्रसन्ना मणिकर्णिका ॥ १७॥

इति श्री गङ्गाधरकवि विरचितं श्रीमणिकर्णिकास्तोत्रं सम्पूर्णम् ।

Encoded and proofread by Aaditya Kalyanaraman

*Manikarnika Ashtakam*

pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*